# Brahmakamandalutirtha Stotram

# બ્રહ્મકમણ્ડલુતીર્થસ્તોત્રમ્

## Document Information

Text title : Brahmakamandalutirtha Stotram

File name : brahmakamaNDalutIrthastotram.itx

Category : ganesha, mudgalapurANa, stotra, tIrthakShetra

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM ShaShTaH khaNDaH | adhyAyaH 25 | 6.25 4-17||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 4, 2024

*sanskritdocuments.org*

# બ્રહ્મકમણ્ડલુતીર્થસ્તોત્રમ્

॥ શ્રીગણેશાય નમઃ ॥
દેવર્ષય ઊચુઃ ।
સર્વાદિભૂતં ત્રિગુણેષુ સંસ્થં તીર્થેષુ યત્ સર્વવિકારહીનમ્ ।
તીર્થં તુરીયં ચ નમામહે તત્તીર્થાત્મકં પાપવિનાશદક્ષમ્ ॥ ૪॥
ગઙ્ગાદિનદ્યઃ પ્રભવા યતશ્ચ સર્વાન્તરસ્થં સ્થિતમાત્મરૂપમ્ ।
નાદાત્મકં રૂપમથો વિધાય તચ્ચાલકં યત્તુ નમામહે તત્ ॥ ૫॥
પુરાણગીતં વિધિપાપનાશં કમણ્ડલુસ્થં પરમપ્રમેયમ્ ।
અપારતીર્થેષુ તદાત્મભાવં ભવિષ્યતે દેહધરં નમામઃ ॥ ૬॥
નાથો વિધાતા ચ ભવેન્મહાત્મન્ પાપેન યુક્તશ્ચ તથા સ્થિતશ્ચેત્ ।
વિશ્વં પરં નાશમુપૈષ્યતિ ત્વં પ્રત્યક્ષતામેહિ દયાકરાતઃ ॥ ૭॥
ગઙ્ગાસ્વરૂપાય નમો નમસ્તે બ્રહ્માત્મજારૂપધરાય તુભ્યમ્ ।
તુભ્યં પ્રયાગાય ચ નાર્મદાય કાલિન્દિકાસ્થાય નમો નમો વૈ ॥ ૮॥
કૃષ્ણાસ્વરૂપાય કકુદ્મતીસ્થ યદ્દેવનદ્યૈ ચ પયોષ્ણિકાયૈ ।
વેણીસ્વરૂપાય ચ પુષ્કરાય તાપીપ્રભાસાય ચ સર્વતીર્થ ॥ ૯॥
ગોદાવરીરૂપધરાય તુભ્યં ક્ષિપ્રાસ્થસિન્ધુસ્થ મહીસ્વરૂપ ।
કાવેરિકાસ્થં સરયૂસ્વરૂપં પૂર્ણે નમસ્તેઽસ્તુ કમણ્ડલુસ્થમ્ ॥ ૧૦॥
સાર્ધત્રિકોટીપ્રવરસ્થકાય તીર્થેશ્વરાયૈવ નમો નમસ્તે ।
અનન્તતીર્થપ્રવરાય નિત્યં ક્ષેત્રે મયૂરે તુ સમાસ્થિતાય ॥ ૧૧॥
વારામ્પતિસ્થાય સરોવરાય વાપીસ્થકૂપાય નમો નમસ્તે ।
યદ્યજ્જલં ભાનુધનસ્થરૂપં તત્રસ્થકાયૈવ નમો નમસ્તે ॥ ૧૨॥
ત્વયા તતં સર્વમિદં વિભાતિ ચરાચરસ્થં ચ જલં પરેશ ।
કૃપાકટાક્ષામૃતધારયાઽસ્માન્ રક્ષસ્વ સન્દર્શય તે સ્વરૂપમ્ ॥ ૧૩॥
(ફલશ્રુતિઃ)
ભૃશુણ્ડ્યુવાચ ।
એવં સંસ્તુવતાં તેષાં પુરસ્તેજોમયં જલમ્ ।

પ્રાદુર્બભૂવ તત્ દૃષ્ટ્વા પ્રણેમુઃ સસુરર્ષયઃ ॥ ૧૪॥
તાનુવાચ મહાતીર્થં હર્ષયુક્તેન ચેતસા ।
વરં વૃણુત દેવેશા મુનયસ્તં દદામ્યહમ્ ॥ ૧૫॥
ભવત્કૃતમિદં પુણ્યં સ્તોત્રં મે પ્રીતિવર્ધનમ્ ।
ભવિષ્યતિ ન સન્દેહો ભુક્તિમુક્તિપ્રદાયકમ્ ॥ ૧૬॥
પઠતે શ‍ૃણ્વતે નિત્યં મયિ સ્નાનફલપ્રદમ્ ।
સર્વાઘનાશનં સદ્યો ભવિષ્યતિ વિશેષતઃ ॥ ૧૭॥

ઇતિ બ્રહ્મકમણ્ડલુતીર્થસ્તોત્રં સમ્પૂર્ણમ્ ॥

- ॥ મુદ્ગલપુરાણં ષષ્ટઃ ખણ્ડઃ । અધ્યાયઃ ૨૫ । ૬.૨૫ ૪-૧૭॥

- .. mudgalapurANaM ShaShTaH khaNDaH . adhyAyaH 25 . 6.25 4-17..

Proofread by Yash Khasbage, Preeti Bhandare

*Brahmakamandalutirtha Stotram*
pdf was typeset on June 4, 2024

Please send corrections to *sanskrit@cheerful.com*